# श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः, नवदेहली



# शिक्षणाधिगमकेन्द्रम्

## पण्डितमदनमोहनमालवीय-राष्ट्रिय-शिक्षक-शिक्षणयोजना

**शिक्षामन्त्रालयः, भारतसर्वकारः**

**चरणम्-V, कार्यक्रमः - 01**

**त्रिदिवसीया-ऑनलाइन-राष्ट्रियकार्यशाला**

# विडियो विकासः सम्पादनं च

**19 तः 21 मई, 2021**

## परिचयः

नवदेहलीस्थ श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयस्य (केन्द्रीयविश्वविद्यालयः) शिक्षणाधिगमकेन्द्रस्य स्थापना **भारतसर्वकारस्य शिक्षामन्त्रालयस्य पण्डितमदनमोहनमालवीय-राष्ट्रिय-शिक्षक-शिक्षणयोजनानन्तर्गतत्वेन** (PMMMNMTT) पाठ्यचर्यायाः शिक्षणशास्त्रस्य च उत्कृष्टताकेन्द्रस्य घटकस्यान्तर्गतत्वेन कृताऽस्ति। एषा योजना शिक्षायाः सर्वस्तरेषु गुणवत्तावर्धनाय आरब्धा। केन्द्रस्यास्य मुख्योद्देश्यमस्ति भाषाशिक्षायाः विशिष्टरूपेण संस्कृताध्यापकेषु अध्यापकशिक्षकेषु च शिक्षणाधिगमप्रणालीनामभिकल्पन-विकास-क्रियान्वयन-मूल्याङ्कनसम्बद्धं च कौशलोत्पादनम्। **इदं केन्द्रं भारतसर्वकारस्य शिक्षामन्त्रालयस्य उच्चशिक्षाविभागेन नवनियुक्तानामध्यापकानां कृते निर्धारितस्य अनिवार्य-मासिक-संकाय-अनुबोधन-कार्यक्रमस्य (FIP) संचालनाय निर्दिष्टेषु 30 नवकेन्द्रेषु चिह्नितमस्ति। केन्द्रमिदं संस्कृतविषये SWAYAM मञ्चमाध्यमेन शिक्षणे वार्षिकपुनश्चर्यापाठ्यक्रमनिर्माणाय Annual Refresher Program in Teaching (ARPIT – 2018, 2019, 2020) राष्ट्रियसंसाधनकेन्द्ररूपेण (NRC) अधिसूचितमस्ति। केन्द्रेणानेन उच्चप्राथमिकस्तरस्य माध्यमिकस्तरस्य च संस्कृतशिक्षणाय पृथक्-पृथक् द्वयोः संदर्शिकयोः प्रकाशनमपि कृतम्। चतुर्थचरणपर्यन्तं केन्द्रेण 34 कार्यक्रमाः 3 संकायानुबोधनकार्यक्रमाश्च सफलतया समायोजिताः, तत्र 2023 प्रतिभागिनः लाभान्विताः अभवन्। पञ्चमचरणस्य सर्वेषां कार्यक्रमाणां संचालनं माननीयकुलपतिमहोदयानां संरक्षणे भविष्यति।**

## सन्दर्भः

इदानीं कोरोनामहारोगप्रकोपसमये वर्तमान-वैश्विकशैक्षिकजगत् ऑनलाइनशिक्षणे अधिगमे च संघर्षरतः दृश्यते। अस्यां शैल्यां शिक्षकः समकालिकरूपेण असमकालिकरूपेण वा छात्रैस्सह सम्प्रेषणं कुर्वन् अधिगमसामग्रीः प्रेषयति। वर्तमानपरिस्थितिषु छात्रान् कार्येषु संलग्नाय विडियो इति सशक्त-ई-संसाधनरूपेण प्रकटितमस्ति, विशेषरूपेण अर्जितज्ञानकौशलयोः अनुप्रयोगाय, पाठ्यवस्तुनः पुनरावृत्त्यर्थं पुनर्बलनप्रदानाय च। एतदतिरिक्तं विडियो इत्यस्य विशिष्टमहत्त्वमस्ति यदा अस्य निर्माणं पाठ्यक्रमाधारितपाठ्यवस्तुनः अनुगुणं छात्राणाम् अधिगमावश्यकतायै, शैलीस्तरयोः अनुरूपं क्रियते। एतत् दूरस्थाधिगमस्य अवसरान् सुगमान् करोति यतोहि एतत् 'कदापि' 'कुत्रापि' अभिगम्यं भवति। अनेन सहैव एतत् ऑफलाइन-ऑनलाइन शिक्षणस्य अधिगमस्य च मध्ये उत्पन्नरिक्ततामेव न पूरयति अपितु एतस्मिन् ऑनलाइनशिक्षणस्य अधिगमस्य च गुणवत्तासंवर्धनाय अपारक्षमता अस्ति। अतः विभिन्न सॉफ्टवेयर्स-टूल्स इत्यादीनां प्रयोगेन विडियोनिर्माणसम्पादनयोः कुशलतायाः आवश्यकता अनुभूयते। सन्दर्भेऽस्मिन् त्रिदिवसीय-ऑनलाइन-राष्ट्रियकार्यशालायाः आयोजनं विशेषरूपेण शिक्षकाणां कृते एतदर्थं क्रियते येन विभिन्नानां सॉफ्टवेयर्स-टूल्स-प्रयोगेण तेषां विडियोनिर्माणस्य सम्पादनस्य च कुशलता संवर्धिता स्यात्।

## उद्देश्यानि

अस्याः कार्यशालायाः उद्देश्यानि -

- विभिन्न विडियोनिर्माण-सम्पादनसम्बद्धानां सॉफ्टवेयर्स इत्यादीनां परिचयः।
- विडियोनिर्माणसम्पादनप्रक्रिया विभिन्नविधिषु अन्तर्दृष्टिप्रदानम् च।
- विडियोनिर्माणसम्पादनसम्बद्धानां विभिन्नकौशलानां कुशलतानाञ्च संवर्द्धनम्।

## लक्ष्यसमूहः

- सर्वेषां विषयाणाम् उच्चशिक्षासंकायसदस्याः, विशेषरूपेण भाषाशिक्षकेभ्यः परम्परागतविषयाणां यथा- व्याकरण-वास्तुशास्त्र-दर्शन-साहित्य-धर्मशास्त्र-ज्योतिषशास्त्रस्य च शिक्षकेभ्यः प्राथम्यं दास्यते।
- परम्परागतविश्वविद्यालयेभ्यः आधुनिकविश्वविद्यालयेभ्यश्च अध्यापकशिक्षकाः।
- केवलं संस्कृतविषयस्य TGT-PGT शिक्षकाः।

## पंजीकरणम्:

कार्यशालायाः **पंजीकरणशुल्कं ₹300/- (अप्रतिदेयम्)** निर्धारितमस्ति। इच्छुकप्रतिभागिनः https://forms.eduqfix.com/slbsnsuform/home लिंकद्वारा **16 मई, 2021 रात्रि 10 वादनपर्यन्तं** ऑनलाइनपंजीकरणं कर्तुं शक्नुवन्ति। अधिकतमप्रवेशक्षमतानुगुणं पंजीकरणदृष्ट्या एतत् लिंक अंतिमदिनांकतः पूर्वमपि अवरोद्धुं करिष्यते। कार्यशालायां **प्रवेशक्षमता 100** अस्ति। पंजीकरणं **'पूर्वमागच्छन्तु पूर्वं प्राप्नुवन्तु'** आधारेण भविष्यति ।

### सक्रियप्रतिभागतायै अपेक्षितसामग्री : -

1. लैपटॉप/ कैमरा-माइक्रोफोन संयुक्त कंप्यूटर/स्मार्टफ़ोन ।
2. उत्तम इन्टरनेट कनेक्टिविटी (अन्तर्जाल सम्पृक्तता) न्यूनातिन्यूनं 5 जीबी डाटा प्रतिदिनम् स्यात्।

## महत्त्वपूर्णसूचना

ऑनलाइन प्लेटफार्मः
गूगल मीट

- ✓ प्रतिभागितायै ऑनलाइन पंजीकरणमावश्यकमस्ति।
- ✓ कृपया पंजीकरणप्रपत्रे स्वकीयं वैध ईमेल, Whatsapp संख्यां च सूचयन्तु यतोहि कार्यशालासम्बद्धं सर्वमपि सम्प्रेषणं अनयोः माध्यमेन भविष्यति ।
- ✓ कार्यशालायाः प्रतिभागिता/ पूर्णता (निष्पादनाधारितं ग्रेड) ई-प्रमाणपत्रं प्रदास्यते ।

**समन्वयकः संयोजकश्च** — **प्रो. अमितापाण्डेयभारद्वाजः**
**निदेशकः**

**सह-संयोजकः** — **डॉ. पिंकीमलिक**

**कार्यक्रमसुगमकर्तारः** — **श्रीसुरेन्द्रनागरः, श्रीज्ञानचन्दशर्मा, श्रीराकेशकाण्डपालः, श्रीअक्षतडबरालः, श्रीसचिनकुमारश्च ।**

**संरक्षकः**
**प्रो. रमेशकुमारपाण्डेयः**
**कुलपतिः**

**आयोजकः**

# शिक्षणाधिगमकेन्द्रम्

**पण्डितमदनमोहनमालवीय-राष्ट्रिय-शिक्षक-शिक्षणयोजना, शिक्षामन्त्रालयः, भारतसर्वकारः**

## श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः

(केन्द्रीयविश्वविद्यालयः), नैक द्वारा 'ए' श्रेण्यां प्रत्यायितः
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016
अतिरिक्तसूचनार्थम्-
सम्पर्कसूत्रम् -9891777666, 9716692396, 8285513959
ई-मेल: tlc@slbsrsv.ac.in वेबसाइट: www.slbsrsv.ac.in